विज्ञापनम् ।

परमर्षिकल्पश्रीमदुदयनाचार्य्यमहोदयप्रणीतन्यायकुसुमाञ्जलिकारिकांशस्य या व्याख्या श्रीमता विद्वद्वरेण हरिदासभट्टाचार्य्येण व्यरचि तस्या अतिसंक्षिप्तत्वादन्तरान्तरा अतिदुर्बोधत्वाच्च तया व्याख्यया कारिकाया अनेकांशतात्पर्य्यं न सुव्यक्तमभवत् अत उक्तहरिदासकृतव्याख्याया विवरणे प्रवृत्तोऽस्मि, कियती कृतकार्य्यता मयाप्राप्ति तद्वक्तुं न शक्यते। अथवा मादृशजनस्य कृतकार्य्यतायाः सम्भावनापि नास्ति, मन्दमतेर्ममेदृशदुरूहव्यापारे हस्तक्षेपः केवलं उपहासाय मन्ये । भवतु तावत्, ममेयं विवृतिर्यदि विद्यार्थिनां लेशतोऽप्युपकारसाधिका भवेत् तदाहं सफलश्रमो भविष्यामि। गुणमात्रग्राहिणां विदुषां सविधे सविनयमिदं विनिवेदयामि यत् विद्वद्भिर्ममैतस्या विवृतेर्दोषांश्च परित्यज्य यदि लेशतोपि गुणोवर्त्तते स एव ग्रहीष्यते इति। साहसमपीदमेतादृशदुरूहव्यापारे मम प्रवृत्तेर्निदानं। एतद्विवृतिप्रणयने मया टीकात्रयात् साहाय्यं परिप्राप्तं, एका वर्द्धमानकृतटीका, अपरा रामभद्रकृतटीका अपरा च प्रायन्तपण्डितराधामोहनगोस्वामिकृतटीका। स्थानविशेषे उक्तान्यतमटीकाया अंशविशेष अपरिवर्त्तितभावेनैव अस्या विवृतावुद्धृत । अथेदमपि वक्तव्य कुसुमाञ्जलिपुस्तकस्य पुन. संस्करणकाले वार्द्धक्यात् मदीयनेत्रद्वय अत्यन्तहीनप्रभं जातमतो मुद्रितमुद्राक्षरसंशोधनकाले बहुषु स्थानेषु वर्णविपर्य्ययो जात स विपर्य्यय पाठकैरेव सानुकम्पं संशोधनीय इति प्रार्थनीयमित्यलमधिकेन।

महामहोपाध्याय—

श्रीकामाख्यानाथ-तर्कवागीश-शर्म्मा ।

शुद्धिपत्रम् ।

अशुद्धम् ।	शुद्धम्	पृष्ठम्	पङ्क्तिः ।
मदीय	मदीयः	१	८
विबुधा	विबुधा	१	१०
निवघ्नाति	निवघ्नाति	१	११
भवं	भव	१	१८
विज्ञानो	विज्ञानो	२	४
प्रभुना	प्रभुना	२	११
न्याय	न्याय	२	१२
न्यायः	न्यायः	२	१३
सपक्षत्वस्य	सपक्षस्य	२	१५
न्यायलक्षणस्य	न्यायलक्षणस्य	२	१७
न्यायः	न्यायः	२	१७
अतिव्याप्ते	अतिव्याप्ते	२	१८
मूलव्याख्यानावसरे	मूलव्याख्यानावसरे	२	१९
नानुपपत्तिः	नानुपपत्ति	२	२२
संयोम	संयोग	२	२५
सुक्तं	सुक्तं	२	२५
साम्येति	साम्येति	३	१०
पदयु	पदयुग	५	५
निरूप्यते	निरूप्यते	५	१०
हेतु	हेतु	५	१०
मद्	मद्	६	६
स्वर्गापवर्गयोः	स्वर्गापवर्गयोः	६	८

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः ।
धायो	धातो	६	११
भोगस्य	भोगस्य	८	१
जगत	जगत्	८	१७
समाधते	समाधत्ते	८	२०
न्यायप्रयोग्यो	न्यायप्रयोज्या	८	२०
मृतिमपि	श्रुतिमपि	८	२४

श्रीगणेशाय नमः ।

कुसुमाञ्जली ।

प्रथमस्तवकः ।

ईयदीयदनधीतविद्यया तात मात्सुदमाविवर्द्धयन् ।
प्रेप्रणाय भव कामं जन्मनां कोऽपि गोपतनयो नमस्यते ॥

श्रीमत्परमानन्द विश्वनिधि मकरन्दम् ।
यत्पूजितं महेन्द्राद्यैस्तस्मै भक्तिभावतः ॥ १ ॥
कुसुमाञ्जलिटीका या हरिदासेन निर्मिता ।
कालाघ्रातापगमां तां विवृणोमि यथामति ॥ २ ॥
श्रमो मदीय साफल्यं तदैव समवाप्स्यति ।
सन्तोषाय च महतामध्यात्मविदुषां यदि ॥ ३ ॥

प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकविघ्नसमूहविध्वंसनमनसा ग्रन्थकारः ईश्वरनमस्कारं शिष्यशिक्षार्थं मार्गे निबध्नाति, इयदीयेति, 'इयत्' अल्पकम्, ईयत् यस्या अस्यायमुदरिनेति यावत् 'अनधीता' अनुपदिष्टा यत प्रकृतेऽपि यावत्, ईदृशी या 'विद्या' वाक् तया यद्यपि विद्यामन्दस्य ज्ञानमुक्तत्वं तथापि बाल्यत्वात् भानिन्यात्मविद जनकामुचया वाक्यपरत्वमिति । 'तात मात्सुदमाविवर्द्धयन्' तातस्य मातुश्च आनन्दं जनयन् 'कोऽपि' अनिर्वचनीयः, गोपनन्दनः श्रीकृष्णः, 'नमस्यते' स्वावधिकोत्कर्षवत्तया आत्मनि स्वावधिकापकर्षवत्तया ज्ञापनमेव नमस्कार पदार्थत्वात् । नमस्कारप्रयोजनमाह भवति अत्र 'संसार मिथ्याज्ञानजन्यवासनाः इति यावत्, 'कर्माणि अदृष्टरूपाणि शुभाशुभकर्माणि, 'जन्म' आद्यन्तो देहेन्द्रियसम्बन्धः तथा 'अपचाय' विनाशाय । केचित्तु 'भवजन्मकर्मणाम' इति पाठं कल्पयन्ति अत्र लोके जन्म यत्र तादृशानि यानि शुभाशुभकर्माणि तेषां 'अपचाय' विनाशाय इति व्याचक्षते ।

इष्टदेवतासंकीर्त्तनं ब्रह्मप्रतिपादकसच्छब्दप्रयोगात्मकं मङ्गलञ्च कुर्वन्नेव ग्रन्थनामाह,—

सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो-
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः ॥१॥

एष अनघः निर्दोषः न्यायः समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यं स एव कुसुमाञ्जलिः, मे मम चित्तं रमयतु दुःखासम्पो-

---

इष्टदेवेति, 'इष्टदेवता' अभिमतदेवता, 'संकीर्त्तनम्' ईशेति नामोच्चारणं, ब्रह्मेति, "ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इत्यादिना सच्छब्दस्य ब्रह्मप्रतिपादकत्वं प्रतिपादितम्। ग्रन्थनामाहेति 'ग्रन्थ' शब्दार्थम्, अथवा 'ग्रन्थस्य नाम' प्रसूनाञ्जलिरित्यनेन [illegible] ।

न्याय इति नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः। समस्तरूपोपपन्नेत्यादि, समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यम् [illegible] वाक्यं, न तु [illegible] [illegible] वाक्यम् [illegible] "तच्च न समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यं न्यायः [illegible]" इत्यनेन [illegible] [illegible] च [illegible]। स एव कुसुमाञ्जलिरिति, यद्यपि "तौ युतावञ्जलिः पुमान्" इति कोषात् [illegible] तथापि [illegible] इत्यादिवत् [illegible] [illegible] । दुःखासम्पो- [illegible] [illegible] [illegible]

विहीनं करोतु। अनवद्यं शब्ददोषरहितञ्च, विषयाद्युद्देः पूर्वोद्दे-नैव निरासादिति प्रकाश.। अविघ्नं यथा स्यात् ईशस्य पदयुगे पद्यतेऽनेनेति व्युत्पत्त्या पदं प्रत्यायकं, तद्युगं प्रमाण तर्करूपं, तत्र निवेशित तद्विषयतया उत्पादितः। चेत. कीदृशं भ्राम्यमानं भृङ्ग इव मकरन्दे दुःखविगमोपाये सतृष्णं भ्रमत् दुःखविगमोपायमनुसन्दधत्। प्रसूनाञ्जलिसाम्यमाह, सदित्यादि। सता समीचीनेन पक्षेणानुकूलेन, रविकिरणादिना प्रसरो विकाशो यस्य स तथा, सतां पक्षाणां दलानां विकाशो यत्र स तथेति वा।, सतामनुपहतघ्राणानां परिमलस्य गन्धविशेषस्य प्रोद्बोधेन साक्षात्कारेण मकरन्दस्य आनन्दो येन स.। विमर्दने करपुटविमर्दने न विम्लानः

अ दुःखध्वंसं भवतो मोक्षम्, एतच्च न्यायमते, वेदान्तमते तु यथार्थ एव सम्यक् ज्ञाने दुःखादीनां मनसो धर्मत्वात्। शब्ददोषरहितत्वमिति शब्ददोषास्तु निराकाङ्क्षत्वादिकम्, विषयाद्युद्देरिति विषय चिति सकर्तृका कार्यत्वादित्यादिप्रयोगस्यबोधविषय सकर्तृकत्वादि, तस्याद्युद्दे पक्षादावसत्त्वमित्यर्थः। प्रमाण तर्करूपमिति, अत्र प्रमाणं चिति सकर्तृका कार्यत्वादित्या कारकमनुमानं, तर्कस्तु चित्यादिकं यदि सकर्तृकं न स्यात् तदा कार्यं न स्यादित्याकारकं, अथवा कार्यत्वं यदि सकर्तृकत्वव्यभिचारि स्यात् तदा कर्तृजन्यतावच्छेदकं न स्यात् प्रतिबन्धकसंस्थानवच्छेदकत्वात् इत्येव तत्र तर्कः। अतएव सिद्धान्तमुक्तावल्यामुक्तं, "तत्र तु कर्तृत्वेन कार्यत्वेन कार्यं कारणभाव एवानुकूलतर्क" इति। न चान्वयव्यतिरेकाभ्यां घटत्वावच्छिन्नं प्रति कुलालादित्वविशेषैव हेतुत्वात् एतादृशकार्यकारणभावे मानाभाव इति वाच्यम्। घटत्व पटत्वादिभिर्नानाकार्यं कारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वकल्पनस्यैवोचितत्वात् यद्विशेषयोरिति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्य-कारणभावस्यावश्यकत्वात्। न चैतादृशकार्यत्वेनिश्चायक इति वाच्यम्। कार्यत्वावच्छिन्ना-भावे तत्तत्कार्यभावकूटस्य प्रयोजकत्वकल्पने गौरवात् कृतित्वावच्छिन्नाभावस्यैकस्य प्रयोजकत्वे लाघवादिति। तद्विषयतया उत्पादित तन्निमित्ततया उत्पादित इत्यर्थः। तथाच न्यायपदे पदयुग इत्यत्र निमित्तार्थे सप्तमी। ननु व्याप्ति पक्षधर्मताविषयकतया अनुमाने उदाहरणो-

नान्यथाभूतसंस्थान । अमृततुल्यं रसं प्रस्यन्दते इति प्रस्यन्द, एतादृश माध्वीक मधु, तस्य भूरुत्पत्तिस्थानम् ।

न्यायपक्षे सति प्रामाणिके पक्षतावच्छेदकविशिष्ट इति यावत्, पक्षे सिषाधयिषितसाध्यके धर्मिणि प्रसृत प्रकर्षेण सतो ज्ञानं यस्मात् । एतेनाश्रयासिद्धिस्वरूपासिद्धिबाधनिरास । मता विवेचकानां परि सर्वतोभावेन मत सम्बन्धो व्याप्ति, तस्या प्रोद्बोधेन प्रमथा बहु चलाद आनन्दो येन, एतेन व्यभिचार व्याप्यत्वासिद्धि विरोधाना निरास । विमर्दने विरोधिप्रमाण

प्रमर्यादि[illegible] निमित्तं इति तर्कं [illegible] निमित्तमिति चेत्, न, [illegible] [illegible] निमित्तत्वात् । [illegible] [illegible] [illegible] [illegible] [illegible] प्रति [illegible] [illegible] [illegible] एव [illegible] । [illegible] प्रथमम् । [illegible] [illegible] न स्यात् [illegible] [illegible] । [illegible] [illegible] [illegible], ननु [illegible] [illegible] इति चेत्, न, [illegible] [illegible] [illegible] इति [illegible] । [illegible] [illegible] । किञ्च [illegible] इति [illegible] । [illegible]

चिन्तायां न विवादः न कार्य्याचिमः, तेन सम्प्रतिपत्तिवराहित्यम् । अमूर्ते मोक्षः, स एव दृश्यमाणं, क्वचिदिति इति न्यायात्, प्रसक्त-प्रत्यक्षमानम् । तेन मोक्षस्याप्राप्यता निराकृता । तदेव माध्वीकं, तस्य भूरुत्पत्तिस्थानम् ॥ १ ॥

मन्वीश्वरपदयुक्तिविवेचितस्य न्यायस्य मोक्षरूपफलसम्बन्धे मानाभाव', तत्त्वज्ञानविषयात्मबोधकस्यात्मशब्दस्य संसारनिदान-मिथ्याज्ञानविषयस्यात्ममात्रपरत्वात् तन्मननस्यैव मोक्षोपायत्वात् इति शङ्कायामाह,—

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥ २ ॥

इति सत्याक्षिद्धिर्युदास । प्रकर्षेण व्याप्य अन्वये व्यतिरेके देनेति यावत् तेन भाव्याक्षिद्धिर्युदास । नार्थ देशोऽविच्छिन्नादयाह । सर्वत्रेति अन्वयतो व्यतिरेकतश्चेत्यर्थः, अथवा परित अन्वये व्यतिरेके विपक्षे बाधकात्मा यो मत सम्बन्धो व्याप्तिरूप इत्यर्थः । व्यभिचारेति प्राचीनैः साध्यप्रसिद्धि साधनाप्रसिद्धी व्याप्यत्वासिद्धावन्तर्भावात् न तयो पृथगुपन्यास । विरोधिप्रमाणचिन्ताभावमिति, विरोधिप्रमाण विपरीतकार्यविषयकप्रमिति जनको हेतु तद्भिन्ना तद्विषयक ध्यान, सत्कार्ये सत्प्रयोज्यानुमिति, तद्वत्न तदप्रयोजक, तथाच विरोधिकोटिप्रमापकहेतुविषयकज्ञानकालीन सत्प्रयोज्यानुमित्यप्रयोजकत्वात् यो यो न्याय तत्तदभिदत्त्वात् इति समुदितार्थः । क्वचिदिति इति "क्वचिद्गतो भावो द्रव्यवत् दृश्यते" इति न्यायादित्यर्थः ॥ १ ॥

मन्वीश्वरेत्यादि, ईश्वरमननस्य मोक्षहेतुत्वे मानाभाव, "आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिश्रुतेः आत्मनानाधिकरण्यानुरोधेन तद्विषयकसाक्षात्कारो मोक्षहेतु तद्विषयक मनन मोक्षजनक, आत्मसाक्षात्कारस्य नैश्वरविषयक, मिथ्याज्ञानध्वंसद्वारा हि तस्य तद्धेतुत्वम् । न चेश्वरगोचरं मिथ्याज्ञानं संसारहेतु यत ईश्वरगोचरमिथ्याज्ञानध्वंसद्वारा ईश्वरतत्त्वसाक्षात्कारो हेतुर्भवेत् । किन्तु आत्मगोचरं मिथ्याज्ञानमिति तत्तत्त्वसाक्षात्कार एव

स्वर्गापवर्गयोः स्वर्गतुल्ययोरपवर्गयोः जीवन्मुक्ति-परममुक्त्योः। ईश्वरमननजन्यादृष्टद्वारा आत्मसाक्षात्कारद्वारा वा मुक्तौ हेतुः, "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुतिस्तत्कारणत्वे मानम्। आत्मसाक्षात्कारस्य मोक्षहेतुत्वे मानञ्च "यदात्मानं विजानीयादहमस्मीति पूरुषः। किमिच्छन् कस्य कामाय संसारमनुसंसरेत्" इति॥२॥

मोक्षहेतुरिति व्युत्पित्सत्यर्थेन। कारिकायां स्वर्गेति, स्वर्गोपम. [illegible] स्वर्गापवर्गयोः स्वर्गतुल्यापवर्गयोः. जीवन्मुक्ति-परममुक्त्योः मार्गं उपाय आलम्बन्ति [illegible] इति वाक्यार्थः। यद्यपीश्वर-[illegible] तथापि [illegible]। केचित्तु [illegible] इति न्यायात् [illegible]। [illegible] स्वर्गतुल्यापवर्गाविति, स्वर्गतुल्यत्वञ्चनैव [illegible] जीवन्मुक्ति-परममुक्त्योरिति, जीवन्मुक्तिश्च [illegible] इति जीवित्वं, जीवितस्य शरीर-[illegible]। परममुक्तिः [illegible] दुःखनिवृत्तिरिति यावत्। ईश्वर-मननमिति, श्रुतावत् "तमेव विदित्वेति श्रुत्या "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति श्रुत्या च "आत्मा वा अरे इत्यादि श्रुतिघटकश्रवणस्य [illegible], अतएव "शृणोति भगवान् [illegible] [illegible] इति पुनः" [illegible]। [illegible]। अतएव, "अस्ति तावतो [illegible] आत्मसाक्षा-त्कारोऽस्त्वरोऽपि" इति [illegible]। यदात्मानमिति, यदा पुरुषः अहम-स्मीति [illegible] आत्मानं विजानीयादित्यर्थः। किमिच्छन् कस्य कामायेति, [illegible]। [illegible] ॥ २ ॥

इह यद्यपि यं कमपि पुरुषार्थमर्थयमाना शुद्ध-बुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेश-कर्म-विपाकाशयैरपरामृष्टो निर्माण-कायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोक-वेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष-इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण-इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना यं कारवोऽपि विश्वकर्मेत्युपासते, तस्मिन्नेव जाति-गोत्र-प्रवर-चरण-कुलधर्मादिवदासंसारं सुप्रसिद्धानुभवे भगवति भवे सन्देह एव कुतः किं निरूपणीयं, तथापि—

[illegible]

न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।
उपासनैव क्रियते श्रवणानन्तरागता ॥

श्रुतौ हि भगवान् बहुशः श्रुतिस्मृतीतिहास-पुराणादिषु इदानीं मन्तव्यो भवति, "श्रोतव्यो मन्तव्यः" इति श्रुतेः। "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्" ॥ इति स्मृतेश्च। तदिह सङ्क्षेपतः पञ्चतयी विप्रतिपत्तिः, अलौकिकस्य परलोकसाधनस्याभावात्, अन्यथापि परलोकसाधनानुष्ठान-

---

[illegible]

मत्त्वशात्, तदभावावेदकप्रमाणसद्भावात्, सत्त्वेऽपि तस्याप्रमाणत्वात्, तत्साधकप्रमाणाभावाच्चेति ॥३॥

१. शुद्धो द्वितीयरहितः। बुद्धो बोधस्वरूपः। आदौ सर्गादौ विद्वान् चिद्रूपः। सिद्धः, षड्विधैश्वर्यवान्। अविद्याऽस्मिता-रागद्वेषाभिनिवेशाः पञ्च क्लेशाः। कर्म धर्माधर्महेतुर्याग हिंसादिः।

वैयर्थ्ये, "अनन्यशीघपत्तिरिति" इति स्मरणात्। आत्मात्मशरणेनैति, ध्यान तत्र प्रत्ययैकतानता तस्य अभ्यास नैरन्तर्य तत्र रत इच्छा तेनेत्यर्थः। अथवा क्लिश्नातीति आयात् रज रचयान्, एतादृशेन आत्मात्मनेत्यर्थः। निधा आत्मादिविषय बुद्धि बुद्धि यत्नाभाति प्रकल्पयन् तथा योगम आत्मन्यात्मकारस्य योग अभ्यसनम् इत्यर्थः॥ ~

आचार्यान् व्याचष्टे, शुद्ध इत्यादिना। चिद्रूप इति स्वभावचैतन्य न तु बुद्धिरिव भ्रान्तिज चैतन्य तस्य इत्यत्र। षड्विधैश्वर्यवानिति, "अणिमा लघिमा प्राप्तिः प्राकाम्य महिमा तथा। ईशित्वञ्च वशित्वञ्च तथा कामावसायिता"॥ इत्युक्ताष्टविधैश्वर्यशालित्यर्थः। तत्राणिमा अणुभाव यत शिलामपि प्रविशति। लघिमा लघुभाव यत सूर्यमरीचिमालम्ब्य सूर्यलोकं याति। महिमा महत्त्वं यतो महान् भवति। प्राप्तिरङ्गुल्यग्रेण स्पृशति चन्द्रम्। प्राकाम्यम् इच्छानभिघात यतो भूमावुन्मज्जति निमज्जति यथोदके। ईशित्व भूतभौतिकेषु प्रभुत्वम्। वशित्व भूतभौतिकं वशी भवत्यवश्यश्चान्येषाम्। कामावसायित्व सत्यसङ्कल्पता यथाऽस्य सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति। अविद्या "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" अस्मितेत्यादि, अस्मिता बुद्धिरिति अहमिति चैवाभिमान। अभिनिवेश मरणभीतिजनका ज्ञानविशेष। आशयाद्युर्धिका, जाति जन्म, आयु जीवनकाल, भोग सुखदुःख साक्षात्कार, आशया फलपर्यन्तम् आशेरते इत्याशया धर्माधर्मा। सम्प्रदाय सम्प्रदीयते गुरुणा शिष्यायेति सम्प्रदायो वेदः। यावत्कर्त्तृमिति यावत्कर्त्तृषु सम्प्रदाय युक्तिमत् कर्तृमत्त्वादि तेन तत्सम्बद्धम् इति सङ्क्षेपतो समास। ननु बुद्ध्यादिना परमात्मनस्सिद्धेरेव सिद्धसाधनतापत्तिरिति तत्र मननस्य अभाव इत्यत आह, शब्दसिद्धावधीति, अनुमिताविति, तथाच ईश्वरानुमितौ बुद्धिस्वरूपस्यानुपपत्त्यालोचनेन तदेवोपपत्तौ सिद्धसाधनविशिष्टसिद्ध्यानुमितिप्रतिरोध इति भाव।

[वि]पाका जात्यायुर्भोगाः। धर्माधर्मा आशयाः। निर्माणार्थं कायो निर्माणकायः। सम्प्रदायो वेदः। प्रद्योतक इति प्रकाशकः, वेदस्य नित्यत्वात्। घटादौ कर्त्तव्ये अनुग्राहक शिक्षयिता। शिवोनिस्त्रैगुण्यः। पितामह जनकस्यापि जनकः। इज्यते इति यज्ञः। सर्वज्ञः क्षणिकसर्वज्ञः। आवरणमविद्या राग द्वेष मोहाः

[illegible]

भिनिवेशः ।" उपास्यत्वेन दैवतोमन्त्रादि । यावदुक्तेषु यदुपपन्नं तेनोपपन्नः । चरमं शाखा । यावदसिद्धावप्यनुमित्सयानुमितेर्न समयासत्त्वं दोषाय ।" तुष्यत्विति न्यायेन समयमाह, तदि" हेत्यादि ॥ २ ॥

परलोके विप्रतिपत्तिस्तु शरीरभिन्नात्मनि तु ज्ञानस्य एकत्वासमानाधिकरणत्वादिति न वा इति रूपैः, नरके तु दुःखपदव्याप्ती सुखपदसमपणात् नरक, तादृशी च जातिः कान्यादिशरीर इति वैशेष्यादिकं, तत्र भावकोटि नैयायिकानां अभावकोटि चार्वाकानां शरीरभिन्नदेहादि संबन्धीरत्यन्ताभावेन शरीरभिन्नात्मनि तु ज्ञानस्य एकत्वासमानाधिकरणत्वमित्यर्थः । परलोकभावे तु चक्र सुखदुःखभोगजनकशरीरातिरिक्तशरीरत्वात् न वा इति, चैवमपि प्रसिद्ध ।

साधने तु कार्यप्रतियोगिक प्रतियोगिक प्रागभावान्य प्रागभावविषयकप्रतीतिविषयत्वं न वा इति तत्र तादृशप्रतीतिविषयत्वमित्यम् उभयमते प्रागभावत्वं प्रसिद्धम् तत्र भावकोटि नैयायिकानाम् अभावकोटिर्चार्वाकाणां नैयायिकैः कारणत्वमङ्गीक्रियते तच्च कार्यनियत पूर्ववर्तित्वघटितं नियतपूर्ववर्तित्वञ्च प्रागभावघटितम् अत कारणत्वं प्रागभावविषयकप्रतीति विषयः प्रतियोगिक प्रागभावान्यच, तद्रूपवत् कार्यप्रतियोगिकत्वं वर्तते इति नैयायिकमतं, चार्वाकैः कारणत्वानङ्गीकारात् तन्मते कार्यप्रतियोगिक न कारणत्वमस्ति, कार्यप्रतियोगिकत्व साधनं परस्पराश्रयत्वं कार्यनिरूपकत्व, प्रतियोगिक प्रागभावान्येष्वपि प्रतियोगिक कार्यत्व तच्च प्रागभावप्रतियोगिकत्वम् अत प्रागभावविषयकप्रतीतिविषयं तदादाय प्रागभावमादाय च सिद्धसाधनवारणाय प्रतियोगिक प्रागभावान्यत्व प्रागभावविषयकप्रतीतिविषयविशेषणम् । न च प्रतियोगिक-प्रागभावान्यप्रागभावविषयकप्रतीतिविषयं घटप्रागभावविशिष्टघटसंयोगमादाय सिद्धसाधनं तादृशघटसंयोगे घटप्रतियोगिकत्व वर्तमानत्वादिति वाच्यम् । प्रागभाव विषयकप्रतीतिविषयत्वनिरपेक्ष प्रागभावविषयकप्रतीतिविषयतावच्छेदकधर्मावच्छिन्नपद तावच्छिन्नत्वस्य विवक्षितत्वात् घटप्रतियोगिकत्वं यत् घटसंयोगवृत्तित्वं तदवच्छिन्नतावच्छेदकं घटसंयोगत्वमेव न तु घटप्रागभावविशिष्टा तथात्वाप्रतीतौ नानवच्छेदकत्वात् घटप्र संयोगत्वन्तु न प्रागभावविषयकप्रतीतिविषयतावच्छेदकमिति सव सुगमयुक्तम् । विशिष्ट तु

धर्माधर्मात्मकालौकिकपरलोकसाधने विप्रतिपन्नं प्रति तत्साधनं, सिद्धे च तस्मिन् सदधिष्ठातृतया ईश्वरसिद्धिः, अचेतनस्य कारणस्य सचेतनाधिष्ठानेनैव कार्यजनकत्वात्। तत्साधनायाह,—

> सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः।
> प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः॥४॥

अलौकिकोऽतीन्द्रियः परलोकहेतुरस्तीति प्रतिज्ञा। तत्र प्रथमतः कारणसामान्यसाधनायाह सापेक्षत्वादिति। सापेक्षत्वं कादाचित्कत्वं, तथाच कार्यं सहेतुकं कादाचित्कत्वात् भोजनजन्यतृप्तिवत्। ननु घटादिहेतोः मृदादेः सदातनत्वे घटादेरपि सदातनत्वापत्तिः, तथाच तस्य कादाचित्कत्वं बाधम्, एवं तत्कारणपरम्परापि कादाचित्की सहेतुका वाच्या इत्यनवस्थायामुक्तमनादित्वादिति,

---

अलौकिके परलोकसाधने वर्तते न वा, परलोकसाधने अलौकिकत्वं वर्तते न वेति वा विप्रतिपत्तिः। तथाच कार्यकारणभावाभावे न विप्रतिपत्तिः तथा ईश्वरसिद्धिः, परलोकाभावे च तत्साधनयागादिहेत्वभावे तदुपदेष्टृकतयापि नेश्वरसिद्धिः, तत्साधनसिद्धौ तदधिष्ठातृतयापि नेश्वरसिद्धिरिति चार्वाकाभिप्रायः। द्वितीयादिविप्रतिपत्तिरीतिस्तु द्वितीयादिस्तबकव्याख्यानावसरे दर्शयिष्यते इति॥ १॥

सदधिष्ठातृतयेति। अचेतनात् कारणात् कार्ये चेतनव्यापारकारिकारणतवैयर्थ्यं, तथा चायं प्रयोगः, अदृष्टं चेतनाधिष्ठितम् अचेतनत्वे सति कारणत्वात् कुठारादिवत्। यत् चेतनाधिष्ठितत्वं चेतनव्यापारकारिकारणत्वम्, सापेक्षत्वं सहापेक्षया वर्तमानत्वं, कादाचित्कत्वमिति फलितार्थः, सहेतुकमिति सहेतुकत्वं व्यभिचरितत्वविशिष्टत्वं वैशिष्ट्यं समवायेन स्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वेन सम्बन्धेन। न च किञ्चित्कालावच्छिन्ने भवति किञ्चित्कालावच्छिन्नध्वंसे कादाचित्कत्वं गगनादौ व्यभिचारीति वाच्यम्। उत्पत्तिमत्त्वे सतीति विशेषणात्। न च चार्वाकमते साध्याप्रसिद्धिरिति वाच्यम्। किञ्चिदपि यत्किञ्चित्सहेतुकत्वे तत्सिद्धौ सहेतुकत्वेऽनुमानात्, अतएव भोजनजन्यतृप्तिदृष्टान्तो दर्शितः। अनादित्वादिति कार्यकारणप्रवाहस्येति शेषः। अनादित्वञ्च अनन्तानीत-

बीजाङ्कुरवत् प्रामाणिकीयमनवस्था न दोषायेत्यर्थः। ननु ब्रह्मैव कारणमस्तु किं वा नानाबुद्ध्यात्मिका प्रकृतिरेव वाऽस्तु इत्यत आह, वैचित्र्यादिति, कार्य्यं विचित्रकारणवत् विचित्रकार्य्यत्वात्। ननु दृष्ट यागादेव कारणमस्तु किमदृष्टेन इत्यत आह, विश्ववृत्तित इति, विश्वेषां परलोकार्थिनां वृत्तितः यागादौ प्रवृत्तितः, स्वर्गादिफलकत्व-ज्ञानमेव यागादिप्रवृत्तिजनकं, यागादेश्च तज्जनकत्वं तत्कालावस्थायि व्यापारं विना न सम्भवतीति अदृष्टसिद्धिः। नन्वदृष्टं न भोग-समानाधिकरणं किन्तु भोक्त्रादिनिष्ठत्वेनैव भोगजनकम् इत्यत आह, प्रत्यात्मनियमादिति, भुक्तेर्भोगस्य प्रतिनियतात्मवृत्तित्वात्, व्यधिकरणादृष्टस्य भोगजनकत्वेऽतिप्रसङ्गात् ॥ ४ ॥

---

४ तथात्वप्रामाण्यप्रतियोगित्वम्। ननु कारणभावविशेषादपि कार्य्यस्य एकम् एकजातीयं वा कारणमस्तु इत्याशङ्क्य, [illegible] न च एकस्य ब्रह्मणः नानाबुद्ध्यात्मिकाया प्रकृतेर्वा कारणत्वे कारणवैचित्र्याभावेन कार्य्यवैचित्र्यं कदाचनापद्येतेति वाच्यम्। वेदान्तमते आकाशादावपि [illegible] कार्य्यवैचित्र्यसिद्धत्वात् वेदान्तमते कार्य्यस्य मिथ्यात्वेन [illegible] सांख्यमते च कार्य्यकारणयोरभेदात् कारणवैचित्र्ये कार्य्यवैचित्र्यापत्तेः। [illegible] प्रकृतौ [illegible] कथं तयोः कारणत्वं सङ्गच्छते इति पूर्वपक्षोऽपि निरस्तः। वेदान्त सांख्यमता-नुयायिनैव [illegible] खण्डितत्वादिति। कार्य्यं विचित्रकारणवदिति यथा पटकारणेषि जातीयकारणजन्य [illegible] कार्य्यत्वादित्यर्थः, तथाच दृष्टान्तानुसारेण कार्य्ये विभिन्नविजा-तीयकारणजन्यत्वस्य सिद्धत्वात् नाभिन्नकारणजन्यत्वं न च एकजातीयकारणजन्यत्वं कार्य्यजात-स्येति समुदितार्थः। भोगस्य प्रतिनियतात्मवृत्तित्वादिति, भोगस्य सुखदुःखसाक्षात्कारस्य प्रतिनियतात्मवृत्तित्वात् [illegible], तथाच कारणं कार्य्यसमानाधिकरणं कार्य्यजनकं [illegible] इति [illegible] भोगजनकत्वम् इति [illegible] अदृष्टस्य भोगसमानाधिकरण्ये सिद्धे न तु भोक्त्रनिष्ठत्वम्। ननु समवायेन अदृष्टस्य भोक्त्र-निष्ठत्वेऽपि कालिकसम्बन्धेन भोगसमानाधिकरण्यात् न विरोध इत्यत आह, व्यधिकरणा

अकस्मादेव भवति न किञ्चिदपेक्ष्य कार्य्यमिति, अतएव "अनिमित्ततोभावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्" इति पूर्वपक्षसूत्रं (न्यायसूत्र ४।१।२२) तत्राह।

हेतु-भूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

अकस्मादिति किं हेतुनिषेधपरं भवननिषेधपरं वा स्वातिरिक्तहेतुनिषेधपरं पारमार्थिकहेतुनिषेधपरं वा, अतोभयत्रा हेतुकत्वमलीकहेतुकत्वञ्च पर्य्यवस्यति स्वभावादित्यर्थपरं वा।

ण्डिति तथाच न नकस्मात्भवन कार्य्यं प्रति कालिकसम्बन्धेन पहदस्य कारणस्य पुरुषान्तरीयादृष्टात् पुरुषान्तरीयाभावापत्तिः स्यादिति न च पुरुषविशेषान्तर्भावेन कार्य्यं कारणभाव न तन्त्रापत्तिरिति वाच्यम् पुरुषविशेषस्याभावेन कार्य्यं भावाभावे अनन्यथार्थं कारणभाव प्रसङ्गात् ॥ ४ ॥

काकतालीयम् अकस्मात् भावस्तात् तत्तदवच्छिन्नं सम्प्रतिपन्नम् अतो अकस्माद्भवति। न किञ्चिदपेक्ष्यमिति न कार्य्यं हेतुनियतपूर्ववृत्ति तावत्कं भवत्किञ्चिदभवत् अनिमित्तमनृत्थाय यतः आरम्भ अन्तु तेन च सत्तापि अकारणकत्वमितरत्र यथाच काकतालीयत्वं न हेतुबाधकत्वमकस्मादिति न भाव अनिमित्ततो भावोत्पत्तिरिति अनिमित्तत इति प्रथमा तात् तथैव अनिमित्ता भावोत्पत्ति रत्नस्य तथामाम प्रतीत घटकाद्युत्पत्ति न कारणनियमा अन्यनियमात् कण्टकतैक्ष्ण्याद्युपलम्भात् तैक्ष्ण्यं संस्थानविशेष आस्पदात् मयूरचित्राणिपरितः। अवधिनियतत्वात् नियतावधिकत्वाकाङ्क्षानाम् कार्य्यस्य नियतकालावच्छिन्नत्वादिति भावः न हेतुनिषेध न कारण प्रतिषेध न भूतिनिषेध न भवनप्रतिषेध स्वानुपाख्यविधि स कार्य्यम्, अनुपाख्यम् अलीक तथा विध कारणतावत्वात् न नैव स्वभाववर्णना स्वभावस्य हेतुत्वम् इति समुदितार्थ इति। अकस्मात् यत्र किञ्चनी यत्नि अनुमावपर तदा तस्य तत्वा स्वभावात् स्वभाव भवन तत्त्वे यदि तु भवनमित्र वा तत्ता ध्रुवत्व तत्र ननु भावविरुद्ध भवननिषेधोऽयम् कि अवधानमत्र कार्यैनपि सत्ता भवतीत्यन्यथात् यत्र मध्येऽस्यानुपपत्त्या तत्तत्परः इति भवत्येव च। ……… विना प्रतीत पदार्थो वा निषेधपरता इति कौशल्

स्वं कार्यम्, अनुपाख्यम् अलीकम्। अवधेर्नियतत्वे, नियतावधिक कार्यदर्शनात् अनियतावधिकत्वे च कादाचित्कत्वव्याकोप इति भाव. ॥ ५ ॥

नन्वनादिरेव कार्यकारणप्रवाहः कादाचित्कत्वान्यथानुपपत्त्या कारणसत्ता वह्नित्वावच्छिन्नस्य तृणादिव्यभिचारितया तृणाद्यकारणत्वे ,कादाचित्कत्वव्याकोप कारणान्तरस्य च वक्तुमशक्यत्वात्। तत्र वह्न्यनुकूलैकशक्तिमत्त्वेन कारणता शक्तिश्च पदार्थान्तरं प्रसिध्यति नाना अनित्ये अनित्या "नित्ये नित्यैव सा शक्तिः

तदुभय निरस्यति हेतुभूतीति। यदि विशिष्ट एव नञोऽन्वयात् हेतुप्रयोज्यसत्ताभावो लभ्यते तदा एकविशेषनिषेधस्य विशेषान्तरप्रापकत्वात् पर्युदासवृत्त्या वा हेतुव्यतिरिक्तः लभ्यते, हेतुव्यतिरिक्तश्च कार्यं स्वरूपम् अलीकत्व तथाच स्वानुपाख्यविधि वा नियमति स्वानुपाख्यं ति, यदि नञ्काक्वादिति मन्द अत अध्याहार्य अथवा तदा अभावादेव कार्यस्य कादाचित्कत्वमित्यर्थं, तदाह, स्वभावेति। तदभवतीति हेतु भूतिनिषेधपक्षे स्वानुपाख्यविधिपक्षे चेत्यर्थं, प्रथमपक्ष अभिप्रेत्याह, अहेतुकत्वमिति, हेतुनिषेधपक्ष कार्यस्य हेतुनिरपेक्षत्वमर्थं, भूतिनिषेधपक्षे कार्यस्य अनुत्पत्तिकत्वमर्थं, अन्यपक्षमभिप्रेत्याह, अलीकहेतुकत्वमेवेति, न च अन्ते कार्यहेतुकत्वम् अलीकहेतुकत्व वा। कथम् अलीकहेतुकत्वे पर्यवसन्नोत्युक्ति सङ्गच्छते इति वाच्यम्। तत्र कार्यस्य कार्यपूर्ववर्तित्वासम्भवात् कार्यहेतुत्व न सम्भवति अत. कार्यहेतुत्वकल्पेऽपि अलीकहेतुकत्वे पर्यवसानम् अत एव पर्यवस्यतीति। अनियतावधिकत्वे कार्यस्य नियतकालावच्छिन्ने, कादाचित्कत्वव्याकोप पूर्वोक्तकादाचित्कत्वव्याघात इत्यर्थः ॥ ५ ॥

कादाचित्कत्वस्य सहेतुकत्वव्यभिचरितत्वात् न सहेतुकत्वानुमापकत्वम् इत्यपि स्याच्छङ्का निराकरोति, नन्वनादिरेवेत्यादिना ननु मते तृणादिजन्यतदा कथ तदन्यभावेन कादाचित्कत्वं सहेतुकत्वव्यभिचारि इत्यत आह, वह्नित्वावच्छिन्नस्य तृणसमवधान विनापि, मण्यादिसमवधानेन मन्त्रादिसमवधाने विनापि तृणसमवधानात् वह्न्युत्पत्तेः न तृणादिकं वह्निकारणम्। ननु तृणादि कारणत्वाभावेऽपि तृणादिभिन्न वह्निकारणमस्तु इत्यत आह,

नित्ये भावहेतुजा इति मत्सिद्धान्तात्। वह्न्यनुकूला तृणारणिमणिनिष्ठा शक्तिर्नित्येति तु मतान्तरम्। न्यायमतन्तु तृणादित्वावच्छेदक वैजात्यमेव विजातीयेष्वेकजातीयकार्य्यानुकूलशक्तिकल्पने धूमादिना वह्न्यनुमानं न स्यात् न स्याच्च तृण फुत्कारसमवधानस्य निर्मन्थनारणिसमवधानस्य प्रतिफलितरविकिरणमणिसमवधानस्य च प्रतिनियम कारणतावच्छेदकावच्छिन्नस्यैव कारणतावच्छेदकान्तरावच्छिन्नसमवधाने कार्य्यजनकस्य दृष्टत्वात् फुत्कारमणिसम्बन्धादितोऽपि वह्न्यापत्ते। यदि च तृणफुत्कारादिसम्बन्धादिषु वह्न्यनुकूला एका शक्ति कल्प्यते तदा नैतत् समाधानं परन्तु तार्णवह्न्यादिनिष्ठ वैजात्यं प्रत्यक्षसिद्ध दीपत्वादिवदिति न पदार्थान्तरशक्तिकल्पनम्। अमुमर्थमाह —

कारणतायां च न। तथाच सहेतुकत्वस्य कालिकत्वव्याप्यत्वं [illegible] एवस्य सहेतुकत्वव्याभावात् [illegible] कदा [illegible] सहेतुकत्वं [illegible] अन्य सिद्धो न [illegible] ईश्वरसिद्धिरिति भाव अथ मीमांसक [illegible] तद्व्याप्तिमान्, वह्न्यनुकूलशक्तिमत्त्वं वह्न्यनुकूलत्व मीमांसकाभिमतमेवेत्य अथ [illegible] प्रतिव्यक्तिमत्त्वादपि न [illegible] भावहेतुजो भाव [illegible] यो हेतु [illegible] शक्तिजातं [illegible] तथाच [illegible] शक्ति [illegible] यो हेतु [illegible] तन्निष्ठशक्ती [illegible] न तु [illegible] भाव तत् सिद्धान्तात् मीमांसकसिद्धान्ताविरुद्ध [illegible] मतम् [illegible] न्यायमतन्त्विति [illegible] तथाच [illegible] वैजात्यस्य [illegible] व्यभिचार इति भाव [illegible] विजातीयानां [illegible] एकजातीयवह्न्यनुकूलशक्तिमत्त्वं न कारणत्वं तथा विजातीयानां वह्न्यनु [illegible] एकजातीयवह्न्यनुकूलशक्तिमत्त्वं न कारणत्वं तथाच कारणतावच्छेदकावच्छिन्नस्य कारणतावच्छेदकान्तरावच्छिन्नानुभावकत्वात् [illegible] कारणतावच्छेदकत्व [illegible] [illegible] न स्यात् न भाव प्रतिनियम [illegible] कारणतावच्छेदकविशिष्ट [illegible] इत्यर्थ। फुत्कार [illegible] सम्बन्धादितोऽपीति [illegible] कारणतावच्छेदकस्य [illegible]

प्रवाहो नादिमानेष न विजात्येकशक्तिमान्।
तत्त्वे यत्नवता भाव्यमन्वय-व्यतिरेकयोः॥६॥

एष कार्यकारणप्रवाहः नादिमान् अनादिः। विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः। अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे निर्वाहे यत्नवता भाव्यं यत्नः करणीयः। वैजात्यं कल्पनीयमिति भावः। वह्निसामान्यं प्रति तु विजातीयोऽप्यनुगतधर्मेणैव कारणम्॥६॥

तदवच्छिन्नवह्निकारितया फुत्कारादेर्व्यञ्जकतया [illegible] सह कारितया फुत्कारं सहकारित्वेन मण्यादिकोऽपि [illegible] भावः। दीपत्वादिवदिति यथा दीपत्वम् आलोकविशेषजनकतावच्छेदकं वैजात्यं प्रत्यक्षसिद्धं तथा तृणत्वादिकमपि [illegible] विलक्षणवैजात्यं प्रत्यक्षसिद्धमिति। न पदार्थान्तरं शक्तिः कल्पनीयेति तदपेक्षया [illegible] लाघवमिति भावः। अनुमर्दनादिति [illegible] इत्यर्थः।

कार्यकारणप्रवाह इति कार्याणां कारणानाञ्च प्रवाह इत्यर्थः, न आदिमान् न अवधिमान् न [illegible] इति यावत्। तथाच कार्यस्य [illegible] न तु [illegible] न वा [illegible] भावः। विजातीयेष्विति [illegible], एकशक्तिमानिति विजातीयतृणादीनां [illegible] इत्यर्थः। ननु कथं [illegible] इत्यत आह कारिकायां तत्त्व इति। [illegible] अन्वयव्यतिरेकयोः [illegible] इत्यर्थः, वैजात्यं कल्पनीयमिति तथाच तृणादि[illegible] कल्पनीयत्वात् न व्यभिचार इति भावः। ननु [illegible] प्रति तृणादेः कारणत्वेऽपि [illegible] इति [illegible] आह वह्निसामान्यं प्रति त्विति॥६॥

ननु यथा एक एव दीपः आलोककारी वर्त्तिविकारकारी घटादिप्रकाशकारी च तथा एकमेव ब्रह्म किं वा कार्य्यकारणयोरभेदात् प्रतिपुरुष विभिन्नबुद्धेरभिन्ना प्रकृतिरेव हेतुरस्तु तथाच नादृष्टाधिष्ठातृतयेश्वरसिद्धिरित्यत्राह,

एकस्य न क्रमः क्वापि वैचित्र्यञ्च समस्य न ।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥७॥

एकस्य कारणस्य नियम्यो न कार्य्याणां क्रमः समस्य एकजातीयकारणस्य प्रयोज्यश्च न कार्य्याणां वैचित्र्यं वैजात्यं, तथाच क्रमिककार्य्यनिर्वाहकतया क्रमिककारणसिद्धिः विजातीयकार्य्यजनकतया च विचित्रहेतुसिद्धिरित्यर्थः । शक्तिभेदादेव सजातीयादेकस्मात् कार्य्यवैजात्यम् इति शङ्कां निराकुरुते शक्तिभेदो न

ननु कार्य्यस्य क्रमिकत्वं न क्रमिककारणसाधकं तथा कार्य्यवैचित्र्यमपि न विचित्रकारणसाधकम्, आलोक वर्त्तिविकार घटादिप्रकाशन विचित्रेषु च एकस्यैव दीपस्य हेतुत्वव्यभिचारादिति आशङ्काह नैव सकलकार्य्येषु एकहेतुकत्वं विजातीयकार्य्येष्वपि [illegible] एकमेव ब्रह्म वि [illegible] अभिन्ना प्रकृतिरेव [illegible] एवं एकजातीयकारणमुक्तम् । कार्य्यकारणयोः पुरुषाणां भेदात् प्रतिपुरुषम् [illegible] बुद्धीनां भेदेऽपि प्रकृतिविकारत्वात् प्रकृतेरैक्यात् एकजातीयत्वम् नादृष्टाधिष्ठातृतयेति न च [illegible] [illegible] नियम्यत्वम् [illegible] [illegible] [illegible] [illegible] [illegible] इति ।

वारयितुमाह एकस्येति [illegible] नियम्यत्वं क्वापि क्रमः पि कार्य्ये क्रम क्रमिकत्वं न एकस्य न एककारणस्य [illegible] । कार्य्याणां क्रम इति क्रम क्रमिकत्वम् [illegible] एककारणजन्यकार्य्येष्वपि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] कार्य्यस्य [illegible] [illegible] [illegible] [illegible] कार्य्याणां वैचित्र्यमिति [illegible] [illegible] [illegible]

चाभिन्न इति। द्वौ हेतौ, न शक्तिभेदः अभिन्नो यत्, शक्ति-शक्तिमतोरभेदात्, भेदे च तस्यैव कारणत्वस्वीकारे एकमात्रकारणत्वभङ्गप्रसङ्गो हेतावप्यस्थित्यर्थः। ननु स्वभावादेव एककारणस्य विचित्रकार्यनिर्वाहकत्वम् इत्यत्राह, स्वभावो दुरतिक्रम इति। एकस्मिन् कार्ये जनयितव्ये यः स्वभावः कार्यान्तरजननकाले तस्यानुवृत्तौ दहनस्यापि जलादित्वं स्यात् स्वभावस्य दुरपह्नवत्वादित्यर्थः, प्रदीपस्येव तत्तत्कार्यसामग्रीभेदकल्पनादिति भावः ॥ ७ ॥

ननु दण्डादिर्घटादौ हेतुरस्तु न तु यागादिः स्वर्गादिहेतुरित्यत आह।

विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा।
दृष्टलाभफला वापि (१) विप्रलम्भोऽपि नेदृशः ॥८॥

विश्लेषां. परलोकार्थिनां स्वर्गाद्यर्थं यागादौ प्रवृत्तिर्विफला न, न वा दुःखमात्रफलिका, प्रवृत्तेरिष्टसाधनताधीसाध्यत्वात्। न च

कारणान्तरनानोपकारकत्वाभ्युपगमे स्यात् तदा चक्रविशालीनो न स्यादित्यवधनिरेव कार्यजातस्य एकजातीयकारणजन्यत्वे बाधिकेति भावः। तज्जातीयादेककारणादिति, " तज्जातीयादिति साध्यतताभिप्रायेण, एकस्मादिति वैशाल्यताभिप्रायेण, न शक्तिभेद इति शक्तिमदादि नियामक इति शेषः। अभिन्नो यत इति शक्त्याभिन्नो यत इत्यर्थः। ननु स्वभावादेवेति, पूर्वं कार्यस्य स्वोत्पत्तिकाले स्वभावाधीनत्वं दूषितम् इदानीम् एककारणस्य स्वभावाद्वाद्यमस्येति भाव.। दहनस्यापि जलादित्वं स्यादिति एकस्मिन् कार्ये यस्य स्वभावस्य जनकत्वं कार्यान्तरेऽपि तस्यैव जनकत्वं वाच्यम् अन्यथा एकस्य स्वभावभेदापत्तिरित्यादिना इत्येकस्वभावजन्यत्वेन विजातीयकार्याणामप्येकजात्यं स्यादित्यर्थः। दुरपह्नवत्वादिति दुष्परिहार्यत्वादित्यर्थः। तत्तत्कार्यसामग्रीभेदेति कार्यसामग्रीभेदकल्पनादित्यर्थः। अन्यथा आलोकादीनां युगपदुत्पत्तिरिति ॥ ७ ॥

---

(१) दृष्टलाभफला नापि इति क्वचित् पुस्तके पाठः, स एव समीचीनः।

दृष्टलाभफला पूजा ख्याति धनादिफला तन्निरपेक्षैरपि तदाचरणात्। कश्चित् प्रतारकेण स्वर्गादिफलकतया यागादिकं प्रकल्प्य स्वयमनुष्ठाय धर्म्मितो लोकः प्रवर्त्तते इत्यत्राह, विप्रलम्भोऽपि नेष्टः इति । क एव लोकोत्तरो यः परप्रतारणार्थं नानाविधक्लेशहेतुकर्मभिरात्मानमवसादयेत्। तथाच यागादिप्रवृत्तिरेव स्वर्गादिफलकत्वे यागादेर्मानमिति ॥ ८ ॥

ननु यागादिकं स्वर्गादिहेतुरस्तु न तु तज्जन्यादृष्टं तदित्यत आह,—

चिरध्वस्तं फलायालं न कर्मातिशयं विना ।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥९॥

चिरध्वस्तं यागादि कर्म्म अतिशयं तत्फलानुकूलव्यापारं विना फलाय न अलं न समर्थं चिरध्वस्तकारणस्य व्यापारद्वारैव हेतुत्वं यथा अनुभवस्य संस्कारद्वारकस्य स्मृतौ। ननु भोग्यनिष्ठमदृष्ट

यागादि प्रवृत्तिहेतुता तव [illegible] स्वर्गादिहेतुत्वेऽपि [illegible] प्रमाणाभावात् [illegible] यागादि [illegible] सिद्ध [illegible] यागादेर्मानमितीति तथाच [illegible] [illegible] [illegible] इति भाव ॥ ८ ॥

[illegible] न तु [illegible] [illegible] [illegible] [illegible] न तु [illegible] भाव । चिरध्वस्तमिति [illegible] [illegible] इष्टसाधने [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] व्यापारद्वारैव [illegible] न च [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] इति

कारणमस्तु इति जिज्ञासायामाह, सम्भोग इति, निर्विशेषाणाम् अदृष्टरूपगुणशून्यानाम् आत्मना सम्भोग प्रत्यात्मनियतो भोग, मुक्तेरपि अदृष्टवत्तया स्वीकृतेरपि भूतैर्न स्यात्, भूताना शरीरादीना सर्वात्मसाधारणत्वात् तददृष्टाकृष्टैरेव शरीरेन्द्रियादिभि. सम्भोगजननादित्यर्थ. ॥ ८ ॥

ननु भोग्यादिनिष्ठ एव धर्मविशेषोऽतीन्द्रिय प्रतिनियतभोगादि

तदृजनकत्वात् कृतिमतामनुभवत्वादिति । ननु यावत्सर्वेषु प्रति शरीरेन्द्रियसम्बन्ध मादिविशिष्टा हेतुत्वनियमाय ननु यावत्सम्बन्धविशेष भोग्यादेरपेक्षणे कतथा च तद्धटीकाय तदेव सर्वेषामसम्भवे यावत्सम्भोगकत्वे व्यर्थमित्याह इति, नन्विति सम्भोग इति, तथाच यावत्कार्यादृष्टवत्त्वेन अनुगतेन प्रत्यात्मनियतभोगा नुपपत्तिरिति भाव । तत्र हेतुमाह सर्वात्मसाधारणत्वादिति यावत् सर्वभूतसंयोगाद् भोगित्वेन शरीरादीना तत्तात्मगुणत्वादित्यर्थ । तथाच अदृष्टस्य भोग्यनिष्ठत्वे भोग प्रति स्वाश्रयसंयुक्तत्वसम्बन्धेन अदृष्टगुणस्य कारणता गुणत्वात्तत्कर्मसम्बन्धेन गुणान्तर भोगापत्तिरिति भाव । न च तत्पुरुषीयत्वं प्रति तत्पुरुषीयत्वागमत्वादृष्ट हेतुरिति विशिष्य कार्यकारणभावात् न तदापत्तिरिति वाच्यम् । पुरुषविशेषमन्तर्भाव्य अनन्त कार्यकारणभावकल्पनापेक्षया तत्तदात्मनिष्ठत्वसम्बन्धा भोगादृष्टयो कार्यकारण भावस्य लघुत्वात् । ननु भोग्यनिष्ठादृष्टं विना कथं भोग्यविशेष इत्यत आह तत्र दृष्टादृष्टैरवेति, तथाच तत्पुरुषीयादृष्टजन्यशरीरादिभोग प्रति स्वजनकादृष्टवत्त्वसम्बन्धेन भूताना हेतुत्वात् भोग्यविशेष नानुपपत्तिरिति भाव । न च भोग्यनिष्ठादृष्टस्य "भूता सम्भिन्नमदृष्टे" इत्यनेन पूर्वमेव निरस्तत्वात् "सम्भोगो निर्विशेषाणाम्" इत्यस्य पौनरुक्त्य मिति वाच्यम् । "सम्भोगो निर्विशेषाणाम्" इत्यादि प्राकृतस्यैव विवरणत्वेन पौनरुक्त्या सम्भवात् । न चादृष्टस्य भोग्यनिष्ठत्वेऽपि अदृष्टाधिष्ठातृतया ईश्वरसिद्धिप्रसङ्गात् अदृष्टस्य आत्मनिष्ठत्वसाधनमयुक्तमिति वाच्यम् । अदृष्टाधिष्ठातृतया ईश्वरसिद्धि सम्भावनया आत्मनिष्ठत्व, न भोग्यनिष्ठत्वमिति अनुमानमनुरुध्येन अदृष्टस्य आत्मनिष्ठत्व साधनादिति ॥ ८ ॥

ननु यद्वा शब्दगुणमाश्रित्य भोगसाधनवनितादिशरीरे भोगजनकतावच्छेदिका

नियामकोऽस्तु यथा दाहादिनियामका वह्न्यादिनिष्ठ शक्तिभेद अन्यथा तादृशादेव करतलानलसंयोगात् सति प्रतिबन्धकेऽपि दाहापत्ते। न च मण्याद्यभाव एव कारणमस्त्विति वाच्यम्। कारणस्य भावत्वव्याप्यत्वात् किन्तु शक्तिनाशं करोतीति मण्यादि प्रतिबन्धक उच्यते तथाच शक्तिः स्वीकार्या इत्यत आह।

भावो यथा तथाऽभावः कारणं कार्य्यवन्मतः।
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः॥ १०॥

यथाऽन्वयव्यतिरेकाभ्यां भावो ध्वंसः कार्य्यं तथाऽभावः कारणमपि कारणत्वं भावत्वव्याप्यमित्यस्याप्रयोजकत्वात्। यत्किञ्चित्कारणस्य प्रतिबन्धकत्वानुपपत्तिरित्यत आह प्रतिबन्ध इति विसा-

---

मणि [illegible] वा च [illegible] [illegible] कारणात् [illegible] [illegible] [illegible] [illegible] सति [illegible] [illegible] ननु [illegible] [illegible] [illegible] कारणानि [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible]।

कारिकार्थ [illegible] [illegible] [illegible] [illegible] [illegible] कारणतावच्छेदकान्वयव्यतिरेकानु-विधायक [illegible] [illegible] कार्य्यं तथा [illegible] कारणम्। ननु कारणत्वं भाव

मणौ कारणाभावः, स च प्रकृते मण्याद्यभावस्याभावो मण्यादि तत्समवधानहेतुं पुरुष एव प्रतिबन्धकः, स्वार्थे कप्रत्ययेन च मण्यादौ प्रतिबन्धकपदप्रयोग इति भावः। मीमांसकास्तु उत्तेजकाभावकूट-विशिष्टमण्यभावत्वेन हेतुत्वे गौरवात् लाघवाच्छक्तिर्नित्या वह्न्यादौ कल्प्यते। प्रतिबन्धके सति शक्तिकुण्ठनम्। यत्तु शक्तिः प्रथमतो वह्निकारणजन्या वह्निनिष्ठा, प्रतिबन्धकेन च तस्या विनाशे उत्ते-जकेन च पुनर्जननम्। न च शक्तेरनियतहेतुकत्वम् इति वाच्यम्। शक्त्यनुकूलशक्तिमत्त्वेन कारणत्वादिति, तन्न, वह्निनिष्ठनानाशक्तिकल्पनापेक्षया उत्तेजकाभावविशिष्टमण्यभावस्यैकस्यैव परं हेतुत्वौचित्यात्। तथाचाकुण्ठितशक्तिरेव तत्र कारणतावच्छेदिका कल्प्यते

तत्साध्यत्वमिति नियमे व्यभिचार इत्यत आह कार्यवदिति, यथा घटध्वंसाभावस्य किञ्चिदनियतोपादानेन किञ्चिदवच्छिन्नत्वं तथा अभावस्य किञ्चिदवच्छिन्नत्वं पूर्ववर्तित्वेन किञ्चित्कारणत्वं, तत्तथा कारणतावच्छेदके तुल्ययुक्त्या व्याप्यत्वव्याप्यत्वं अपि स्यात् इति भावः। ननु मण्याद्यभावस्य कारणत्वे सिद्धे मण्यादेः प्रतिबन्धकत्वं भवतु पाञ्चे तत्र मण्यादौ कथं सम्भवति, प्रतिपूर्वकबन्धधातूत्तरकर्तृविहितण्वुल्प्रत्यय-सिद्धप्रतिबन्धकपदेन प्रतिबन्धकत्वं बोधनात् अचेतने मण्यादौ तत्कर्तृत्वाभावात् मण्यादौ तद् व्यवहारो भाक्त एवेत्याह व्याख्यातृणाम् अकिञ्चित्करत्वमिति। प्रतिबन्धकपदप्रयोग इति, तथाच प्रतिबन्धकसमवधानहेतुभूतपुरुष एव, प्रतिबन्धकपदस्य मुख्यार्थ इति भावः। एवञ्च मण्यादिनिष्ठदाहानुकूलातिरिक्तशक्तिकल्पनायाः सिद्धा भाक्तानुमानेन आर्षादिप्रत्यक्ष-सिद्धिरिति तात्पर्यम्। न च [illegible] भोग्यत्वनियमः कथं तथा भाग्यानां भाग साधनत्वमिति वाच्यम्। यथा वह्न्यादि वैजात्येनैव दाहादिहेतुतया तथा भाग्यवतां वह्न्यादीनामप्यदृष्टसम्बन्धतावच्छेदकवैजात्यादिनैव हेतुत्वात्। न चाभावेन प्रत्यक्षं न तु भोग्यत्वनियमः किं विनिगमकमिति वाच्यम्। अनन्तभोक्तृनिष्ठानन्तादृष्टकल्पनापेक्षया एकशक्तिनिष्ठादृष्टकल्पनस्यैव लघुत्वात्। उत्तेजकाभावकूटत्वादि, तत्पक्षस्य प्रतिबन्धक तावच्छेदकीभूताभावप्रतियोगित्वं, उत्तेजकाभावविशिष्टत्वे प्रतिबन्धकत्वेन इति तावच्छेदकीभूताभावप्रतियोगिनो उत्तेजकादेरुत्तेजकत्वम्। शक्तिकुण्ठनमिति,

इत्याह । तत्र, शक्तिकुण्ठने प्रतिबन्धकस्य हेतुत्वमुत्तेजकस्य कुण्ठितत्वविनाशकत्वमित्याद्यनन्तशक्तिकल्पनापत्तेरिति दिक् ॥ १० ॥

ननु "व्रीहीन् प्रोक्षति" "व्रीहीनवहन्ति" इत्यत्र प्रोक्षणजन्य काल्पतरभाव्यवघातजनको व्यापारो व्रीहिनिष्ठ कल्प्यते, 'प्रोक्षिता एव व्रीहयोऽवघाताय कल्पन्ते" इति वाक्यशेषात्। किञ्च यो यद्दुत्पन्नाश्रितया क्रियते स तन्निष्ठफलजनकव्यापारजनक यागवत् किञ्च व्रीह्यादीनामापरमाणुत्वप्रसङ्गे व्रीह्यादिनियमानुपपत्ति । एवं मायकर्षणादिना भूमिनिष्ठा कृषिजन्या शक्तिर्निर्वाच्या ।

अत्रोत्तरम् ।

कुण्ठन [illegible] मीमांसकमते शक्तिनिष्ठ [illegible] मीमांसक [illegible] इति [illegible] कदाचित् [illegible] इति [illegible] ॥ १० ॥

मीमांसकः पुन [illegible] व्रीहि [illegible] इति [illegible] व्रीहिनिष्ठमिति [illegible] इति [illegible] "[illegible]" इति [illegible] इति [illegible] इति [illegible]

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः ।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥ ११ ॥

प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंस एव पुंसि दृष्टं स्वीकृतं, प्रतिव्रीहि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यावघातजनकस्य लाघवेन कल्पनात् दृष्टद्वाराभावे सति विहितस्य कालान्तरभाविफलानुकूलस्य धर्मजनकत्वकल्पनाच्च । संस्कृतो व्रीहिरिति प्रत्ययबलाच्च तस्य स्वरूपसम्बन्धेनैव व्रीहिनिष्ठत्वं कल्प्यते एतेनाभिमन्त्रितपयःपानवादादावपि तत्तत्फलानुकूलमदृष्टं पुरुषनिष्ठम् । व्रीहीनिति च शत्रून् प्रोक्षति इत्यादावपि प्रोक्षणादिजन्यजलसंयोगादिरूपपरसमवेतक्रियाजन्यफलशालितया कर्मता । यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनक इति च धातुनिष्ठधात्वर्थक्रियमाणत्वेनादौ स्वनिष्ठफलजनके व्यभि

कुर्वन्ति चकारेण च व्रीह्यादिपरत्वस्य [illegible] न पृथक् पृथक् प्रति व्रीह्यादौ नैव प्रोक्षणादिजन्यातिशय इति भावः । दोषान्तरमाह लाघवेनादि तथाच [illegible] व्रीह्यादिनिष्ठसंस्कारकल्पना [illegible] व्रीह्यादौ नेति भावः । एवञ्च प्रतिव्रीहि तदुत्पादने न गौरवञ्च न [illegible] प्रतीति पूर्वपक्षाशयः ।

न प्रोक्षणादिजन्यातिशयविशेषात्मा तस्य व्रीहिनिष्ठत्वं न सिद्धान्तीत्याह पारिभाषिकः संस्कार इति प्रोक्षणाभ्युक्षणादिभिरिति प्रोक्षणाभ्युक्षण [illegible] परिशीलितम् । अथवा [illegible] व्याख्यायाम् एकस्यैवादृष्टस्येति [illegible] स्वीकर्तुमुचितं तथाच कालान्तरभाविफलानुकूलो व्यापारो लाघवेन एक एव सिद्ध[illegible] तस्य व्रीहिनिष्ठत्वे [illegible] न च [illegible] तत्त्वात् । [illegible] अधिकरणोऽप्यत्र एवा [illegible] विहितम् । दृष्टद्वाराभावे सतीति दृष्टद्वाराभाव सतीत्यर्थः, [illegible] अधिकारवाचकात् [illegible] सार्थकम् । [illegible] प्रोक्षणम् अदृष्टजनकं दृष्टद्वाराभावे सति कालान्तरभाविफलजनकतया विहितत्वात् [illegible] इति ।

चारि। यवाद्युत्पत्तिनियमार्थमाह स्वगुणाः परमाणूनां पाकजादयो विशेषा विशेषकाः, तेन पाकजरूप-रसादिविशिष्टाः परमाणवस्त-त्कार्यमारभन्ते। चिकित्साशास्त्रे तु धातुसाम्यमेव भेषजपानस्य रोगादिनाशे फले जनयितव्ये द्वारमिति भावः ॥ ११ ॥

ननु, अधिकरणादृष्टस्यात्मसमवेतत्वादसिद्धिरत आह, सत्त्वेति [illegible] स्वरूपसम्बन्धेनेति [illegible] [illegible] स्वरूपसम्बन्धेन [illegible] [illegible] अदृष्टस्य [illegible] इति [illegible] तत्र [illegible] [illegible]। ननु तथापि अभि-मन्त्रितपयःप्रभृतौ [illegible] शक्तिः [illegible] अत आह, एतेनेति [illegible] [illegible] अभिमन्त्रितेति, अभिमन्त्रितस्य [illegible] अभिमन्त्र-[illegible] संस्कारविशेषानुकूल[illegible], [illegible]। न च [illegible] संस्कार [illegible] न [illegible] इति वाच्यम्। [illegible] [illegible] स्वरूपसम्बन्धेन [illegible]। [illegible] [illegible] [illegible] 'कर्मत्वं', [illegible] [illegible] कर्मत्वप्रत्यय। [illegible] स्वरूपसम्बन्धेन क्रिया-[illegible] [illegible] [illegible], [illegible] [illegible], [illegible] [illegible], [illegible] कर्मत्वात्। यथा [illegible] इति [illegible] [illegible] [illegible] [illegible] तथा [illegible] [illegible] न [illegible], [illegible]। यो [illegible] [illegible], यो [illegible], [illegible] [illegible] [illegible]। न च [illegible] [illegible] इति वाच्यम्। "[illegible] [illegible]" [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible]। न च [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] इति वाच्यम्। [illegible] [illegible] [illegible]। तत्र [illegible] [illegible] [illegible] [illegible] [illegible]

ननु यत्र पाकजेन विशेषस्तत्र वाय्वादौ कथमुद्भूतस्पर्शादि, करकादौ च प्रतिरुद्धं द्रवत्वमिति, कथञ्च प्रतिमादौ प्रतिष्ठादेरुप योगः, तथाच प्रतिष्ठाजन्या प्रतिमाशालादिस्पर्शनाश्या पूज्यता प्रयोजिका स्वीकार्य्या इत्यताह,—

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥१२॥

निमित्तभेद अदृष्टभेद, देवता प्रतिष्ठाविधिना सन्निधानेनाह ङ्कार ममकारादिना आराधनीयतामामादयन्ति, प्रतिष्ठाविधिना

नाशाद्यभावात् । अनुष्ठापयितीति धातोः भिक्षया यत्र पित्र भक्ता तेषां सत्य विकार निष्ठमि । एव आधकर्षणादिनापि न मन्त्रजन्मनि किन्तु कथमेव पुरुषभिन्नाः मती करणानन्तर चिन्तयता मूर्त्तिर्भवती, पचपरमितैरयुक्तदोषम् ॥ ११ ॥

ननु चित्राय्वादौ उद्भूतस्पर्शादि नास्त्येव च, नास्ति किम् अपि करकादौ द्रवत्वमपि तत्र न सर्वत्र इत्यादौ प्रतिरेव नियामिका वक्तव्या स्वीकार्या, एवं प्रतिमादौ प्रतिष्ठा विधिना पूज्यताप्रयोजक प्रतिरेव वाच्या इति मीमांसक मतं मनसिकृत्याह । कारि कायां निमित्तभेदसंसर्गादिति अदृष्टविशेषसहकृतयोगादित्यर्थः । उद्भवानुद्भवादय इति उद्भूत अनुद्भूतस्पर्शादि, अनुद्भूत उद्भूतत्वमपि प्रतिबद्धद्रवत्वादिरुपं । तथाच उद्भूतस्पर्शादिक अदृष्टविशेषप्रयोज्यं तत्रैवादृष्टजन्यमिति भावः । आराधनी यतामिति प्रतिपाद्य इति शेषः । आराधनीयत्वञ्च देवानीतिर्वैधुक्तिचाराधकत्वं दैवतञ्च मन्त्रीभिधेयमन्त्रस्वचकत्वाद्दौर्ल्लभ्यत्वम् । केचित् देवानां अन्यदीयत्वाभावात् भौतिकज्ञान अन्यदीयत्वज्ञापकीर्यत्वया आराधकपदार्थ कर्मत्वञ्च भौतिकज्ञानविषयत्वम् इत्याह । तत्र । अशरीरस्य परमेश्वरस्य अन्यज्ञान अन्यदीयत्वज्ञानेऽपि प्रतिमादौ पूजनीयस्य शरीरिणो विष्णुदेवताद्यत्वे बाधकाभावात् । अतएव आन्दोलनप्रकाशिकायां तत्र दीपककाशदर्शनेन विष्णु पूजनादिव्यादौ पौराणिकवचनं बालकवृन्दम् । एतेन परमेश्व रस्य अन्यज्ञानाभावात् आहङ्कारज्ञानक्षयोरहङ्कार ममकारयो वाध तत्र सम्भव इति पूर्वपक्षोऽपि निरस्तः । अशरीरस्य परमेश्वरस्य अन्यज्ञानाभावेऽपि शरीरिणो विष्ण्वादे राहङ्कारममकारसम्भवात् । अहङ्कार-ममकारादिनेति सन्निधानेनेत्यस्य विवरणं यथार्थ-

देवतानां प्रतिमादौ अहङ्कारममकारौ, चाण्डालादिस्पर्शे च तादृगभिमानाभावः। देवतार्चनत्वविवादेऽपि यथार्थपूजितत्वधीः प्रतिष्ठितत्वधीश्च चाण्डालादिस्पर्शाद्यभावविशिष्टा पूज्यतानियामिका, तत्र चोपयोगिनी प्रतिष्ठा। वस्तुतस्तु प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शादिसंसर्गाभावः प्रतिष्ठाध्वंसकालीनः पूज्यताप्रयोजकः "प्रतिष्ठितं प्रपूजयेदिति" श्रुतेः प्रतिष्ठाध्वंसस्यैव प्राप्तेरिति दिक् ॥ १२ ॥

पूजितत्वधीरित्यादिक [illegible] [illegible] विवरणम्, अहङ्कार अहमित्य प्रतिनियत-रूप, ममकार, प्रतिमादावपि [illegible] [illegible] । न च देवताना विशेषदर्शनात् [illegible] [illegible] [illegible] इति वाच्यम्। विशेषदर्शनसत्त्वेऽपि [illegible] [illegible] [illegible]। न च [illegible] [illegible] [illegible] प्रतिमादौ पूज्यत्वमिति वाच्यम्। [illegible] [illegible] [illegible] [illegible]। [illegible] पूजितत्व [illegible] प्रतिष्ठित-धीरेति। [illegible] इति [illegible] [illegible] संवर्णनम् [illegible] [illegible] [illegible]। [illegible] [illegible] प्रतिष्ठा [illegible] [illegible] न पूज्यताप्रयोजक, न च [illegible] [illegible] [illegible] प्रतिष्ठाया [illegible] [illegible] पूज्यता-[illegible] [illegible] इति वाच्यम्। तत्र प्रतिष्ठाद्वितीयक्षणे [illegible] तृतीय-क्षणे प्रतिष्ठाध्वंस तत्र द्वितीयक्षण [illegible] प्रतिष्ठाध्वंसकालीनत्वा-भावात् [illegible] [illegible] द्वितीयक्षणेऽपि [illegible] [illegible] पूज्यतापत्ते-रिति चेत्, न, प्रतिष्ठाध्वंस [illegible] [illegible] पूज्यताप्रयोजकत्वविव-क्षणात् [illegible] प्रतिष्ठाध्वंस [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तत् [illegible] तत् न। [illegible] [illegible] [illegible] पूज्यतायामिति विभाव-नीयम् ॥ १२ ॥

ननु तुलापरीक्षादौ परीक्षाविधिना शुद्धिमुखादौ जन्यते तथा गमनोद्वमनादिकं फलं जन्यते, इत्यत आह,—

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम् ।

परीक्ष्यसमवेतस्य परीक्षाविधयो मताः ॥ १३ ॥

जयस्यादितरः पराजयः, तन्निमित्तस्याऽदृष्टस्य परीक्षणीयपुरुषसमवेतस्य वृत्तिलाभाय फलानुकूलसहकारिलाभाय परीक्षाविधयो मताः स्वीकृताः । योऽहमनेन परीक्षाविधिना तुलामारूढः सोऽहं पापवान् निष्पापो वेति ज्ञानं सहकारि । यद्वा वृत्तिलाभाय जननाय, तथा च प्रतिज्ञानुरूपां शुद्धिमपेक्ष्य धर्मोऽशुद्धिमपेक्ष्याधर्मो जन्यते । एतेन ब्रह्मवधाकरणादिना पुण्यस्याजननात् कथं तस्य सहकारि तादृशज्ञानं स्यादित्यपि परास्तम् ॥ १३ ॥

सांख्यास्तु पुरुषश्चैतन्यात्मकः अकारणम् अतएव कूटस्थो नित्यः । प्रकृतिस्त्वचेतना परिणामिनी नित्या एका, प्रकृतेः प्रथमः परिणामो

ननु मतान्तरादृष्टस्येति 'तयोः जयपराजययोः अदृष्टस्य शुभाशुभादृष्टस्य जयनिमित्तस्य धर्मस्य पराजयनिमित्तस्याधर्मस्येति यावत् परीक्षणीयपुरुषेति पापतदभावयोरन्यतर... न निर्णेयपुरुषस्य फलानुकूलेति तादृशापवादैकविषयानुकूलस्य ज्ञानं सहकारि... यतीति यत्नुत पापवान् निष्पापो वा तुलारोहणकाले सोऽहं पापवान् निष्पापो वा इति ज्ञानम् आत्मप्रत्ययात्मकं जायते तादृशज्ञानस्य पूर्वकृतकर्मजनितादृष्टसह-कारित्वं तेन च गमनोद्गमनौ जयपराजयौ च जायेते इति भावः । इदि निष्पाप-फलम् अशुद्धि पापम् । तथाच पापाभावज्ञो योऽहमनेन परीक्षविधिना तुलामारूढः सोऽहं निष्पाप इति प्रतिज्ञा परीक्षाकाले करणकरणस्य तत्र यदि सत्यप्रतिज्ञा भवति तर्हि तत्सहकृतपरीक्षाविधिना धर्मो जायते अन्यथा चेत् असत्यप्रतिज्ञा भवति तादृशकर्मणैव अधर्मः गमनोद्गमनादिकं जयपराजयश्च भवति इति यदस्यादित्यस्य तात्पर्यम् ॥ १२ ॥

प्रधानमनुत्पाद्य निवर्तते सांख्याभिमतं अकारणम् अपरिणामी उच्यते परि

बुद्धिर्महत्तत्त्वं, तत्राष्टौ धर्मा ज्ञानाज्ञानैश्वर्यानैश्वर्य वैराग्या-वैराग्य धर्माधर्मरूपा, बुद्धि सुख दुःखेच्छा द्वेष प्रयत्न धर्माऽधर्माश्चेत्यष्टौ वा, भावनायास्तैरनङ्गीकारात् अनुभवस्यैव स्मृतिकाले सूक्ष्मतयावस्थानात्। अचेतनायाः प्रकृतिकार्याया बुद्धेश्चैतन्याभिमाना-न्यथानुपपत्त्या स्वाभाविकचैतन्यस्वरूप. पुरुष सिद्ध. धर्म धर्मिणोर-भेदात्। तत्र प्रकृतेर्महान् महतोऽहङ्कारस्तस्माद्रूप रस गन्ध स्पर्श

[illegible] इव कारणत्वादिति। [illegible], [illegible] परिणामिनीति [illegible] परिणाम [illegible]। [illegible] प्रकृतिका [illegible] सत्त्वगुणात्मि [illegible]। [illegible] तमोगुण [illegible]। [illegible] बुद्धात्मक [illegible] महत्तत्त्व [illegible] प्रकृति पुरुषविवेक [illegible] [illegible] [illegible] [illegible] [illegible] धर्म [illegible] [illegible] बुद्धिधर्मत्व [illegible] बुद्धि [illegible] [illegible] धर्माधर्माविति [illegible] [illegible] [illegible] [illegible] [illegible] चैतन्यस्वरूप इति, [illegible] [illegible] धर्म धर्मिणोरिति। [illegible] पञ्च महाभूतानि [illegible] [illegible] आकाश [illegible]। [illegible] इन्द्रियाण्येकादश, महाभूतानि पञ्च [illegible] प्रकृति [illegible] पुरुष [illegible]

शब्दतन्मात्राणीति सप्त, चक्षुस्त्वग्घ्राणरसनाश्रोत्रमनांसि वाक्पाणिपादपायूपस्थानि इन्द्रियाणि तन्मात्रैः पञ्च महाभूतानि पृथिव्यप्तेजोवाय्वाकाशानि जायन्ते। तदुक्तम् "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ।" पञ्च महाभूतान्येकादशेन्द्रियाणि चेति षोडश। चैतन्यस्य नित्यस्य स्वाभाविकेष्टानिष्टविषयावच्छिन्नत्वस्वाभाव्येऽनिर्मोक्षः स्यात्, प्रकृत्यधीनत्वेऽपि विषयावच्छेद्यत्वस्य प्रकृतेर्नित्यतया तथैवानिर्मोक्षप्रसङ्गः, घटादेरनित्यस्यापि स्वाभाविकचैतन्यावच्छिन्नत्वे दृष्टादृष्टविभागानुपपत्तिश्च, इन्द्रियमात्रापेक्षो यदि विषयचैतन्यावच्छेदस्तथापि स्वाप्नज्ञानानुपपत्तिरतो मनः स्वीकार्यं यत्सम्बन्धेन इन्द्रियस्य विषयीयचैतन्यावच्छेदनियामकत्वम्। स्वप्नदशायां व्याघ्रत्वाभिमानिनो न नरोऽहमित्यभिमानः अतस्तन्नियमनाय नियतविषयाभिमानव्यापारकोऽहङ्कारोऽपि स्वीकार्यः। जाग्रत्स्वप्नसुषुप्तिषु श्वासप्रश्वासदर्शनात् यस्यायम् यदनुवर्तते तदनुमितश्च ।

विकृतीनामन्यत्वोत्पत्तिरिति तात्पर्यमिति भावः । ननु नित्यमेव चैतन्यं शब्दादिविषयसम्बद्धमस्तु किं महदादिस्वीकारेण इत्याशङ्कायामाह चैतन्यस्येति स्वाभाविकेति स्वाभाविकम् अन्यानपेक्षमेव यत् इष्टानिष्टात्मकविषये सह अवच्छिन्नत्वं अवच्छेद्यत्वम् [illegible] इति यावत् तत्स्वभावे तत्स्वरूपत्वे इत्यर्थः । अनिर्मोक्ष स्यादिति तथाच चैतन्यस्य नित्यत्वात् सर्वत्र चैतन्यात्मकपुरुषस्य विषयसम्बन्धात् मोक्षो न स्यात् विषयसम्बन्धस्य सर्वदैव भोग्यत्वात्, [illegible] महदादिस्वीकारस्य [illegible] नियामकत्वमिति भावः । ननु प्रकृतेरेव विषयावच्छेद्यत्वनियामकत्वमस्त्वित्यत आह प्रकृत्यधीनेति । ननु [illegible] इत्यत आह घटादेरिति दृष्टादृष्टविभागानुपपत्तिश्च [illegible] इष्टं न तदानीं [illegible] व्याघ्रज्ञानानुपपत्तेः [illegible] इन्द्रियार्थविषयसम्बन्धं [illegible] स्वाप्नव्याघ्रादि [illegible] तदनुपपत्ति

प्रागुक्तभावाष्टकयोगि स्तोकार्थम्। तस्य ज्ञानरूपपरिणामेन सम्बद्धो विषयः पुरुषस्य स्वरूपतिरोधायकः, एवञ्च बुद्धितत्त्वनाशादेव विषयावच्छेदाभावात् पुंसो मोक्षः। भेदाग्रहाच्च चेतनोऽहं करोमीत्यभिमानः। तदुक्तं "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" इति। सा च बुद्धिरंशत्रयवती, पुरुषोपरागः विषयोपरागः व्यापारावेशश्चेति, ममेदं कर्त्तव्यमित्यत्र ममेति चेतनोपरागः बुद्धिचेतनयोर्भेदाग्रहात् अतात्त्विकः, इदमिति विषयोपरागः, तदुभयायत्तो व्यापारावेशः। बुद्ध्यारोपितचैतन्यस्य विषयेण सम्बन्धः ज्ञानं, ज्ञानेन सम्बन्धश्चेतनोऽहङ्करोमीत्युपलब्धिरित्याहुः। अत्राह,—

१।

